This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रशस्त

1

॥श्रीगणेशायनमः॥ ॥प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः। पदार्थधर्मसं
ग्रहः प्रवक्ष्यते महोदयः॥१॥ द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्था
नां साधर्म्यवैधर्म्याभ्यां तत्वज्ञानं निःश्रेयसहेतुः। तच्चेश्वरचोदनाभिव्यक्ताद्धर्मा
देव। अथ के द्रव्यादयः पदार्थाः। किं च तेषां साधर्म्यवैधर्म्यं चेति। तत्र द्रव्याणि
॥१॥ पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि सामान्यविशेषसंज्ञोक्तानि
नवैव। तद्व्यतिरेकेण संज्ञांतरानभिधानात्। गुणाश्च रूपरसगंधस्पर्शसंख्या
परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्च क
ण्ठोक्ताः सप्तदश। चशब्दसमुच्चिताः। गुरुत्वद्रवत्वस्नेहसंस्काराः दृष्टशब्दाः

Title - पदार्थधर्मसंग्रह   Sub - न्याय, वैशेषिक

folio - 9   Xerox - 8.

Acc No. M-~~1718~~ 1717

2

सप्तैवेत्येवं चतुर्विंशति गुणाः। उत्क्षेपणापक्षेपणाकुंचनप्रसारणगम
नानि पंचैव कर्माणि। गमनग्रहणात् भ्रमणरेचनस्पंदनोर्ध्वज्वलनतिर्यक्पवन
नमनोन्नमनादयो गमनविशेषा एव। न जात्यंतराणि तराणि। सामान्यं द्विविधं। परमपरं
चानुवृत्तिप्रत्ययकारणं। तत्र परं सत्ता महाविषयत्वात्। सा चानुवृत्तेरेव हेतुत्वात्। सामा
न्यमेव द्रव्यत्वाद्यपरं अल्पविषयत्वात्। तच्च व्यावृत्तेरपि हेतुत्वात्। सामान्यं सद्विशेषा
ख्यामपि लभते। नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः। ते च खल्वत्यंतव्यावृत्तिबुद्धिहेतुत्वात्
विशेषा एव। अयुतसिद्धानामाधार्याधारभूतानां यः संबंध इह प्रत्ययहेतुः स समवायः।
एवं धर्मैर्विना धर्मिणामुद्देशः कृतः। षण्णामपि पदार्थानां साधर्म्यमस्तित्वाभिधेयत्वज्ञे
यत्वानि। आश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः। द्रव्यादीनां पंचानामपि समवायित्वमनेकत्वं च।

K S U LIBRARY RAMTEK 441 106 ~~M-1718~~ Dist. Nagpur

M-1717

Checked 2012

1717 5.01.12 ~~06~~ 1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शास्त्री 3

गुणादीनां पंचानामपि निर्गुणत्वं निःक्रियत्वे। द्रव्यादीनां त्रयाणामपि सत्तासंबंधः।
सामान्यविशेषत्वं स्वसमयार्थशब्दाभिधेयत्वं धर्माधर्मकर्तृत्वं चेति। कार्यत्वानित्य
त्वे कारणवतामेव। कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्यः। द्रव्याश्रितत्वं चान्यत्र
नित्यद्रव्येभ्यः। सामान्यादीनां त्रयाणामपि स्वात्मसत्त्वं। बुद्धिलक्षणत्वं। अकार्यत्वमका
॥२॥ रणत्वं सामान्यविशेषवत्त्वं नित्यत्वमर्थशब्दानभिधेयत्वं चेति। पृथिव्यादीनां नवाना ॥२॥
मपि द्रव्यत्वयोगः स्वात्मन्यारंभकत्वं गुणवत्त्वं। कार्यकारणाविरोधित्वं अंत्यविशेषवत्त्वं॥
अनाश्रितत्वं नित्यत्वं चान्यत्रावयविद्रव्येभ्यः। पृथिव्युदकज्वलनपवनात्ममनसा
मनेकत्वापरजातिमत्वे। क्षितिजलज्योतिरनिलमनसां क्रियावत्त्वमूर्तत्वपरत्वापर
त्ववेगवत्त्वानि। आकाशकालदिगात्मनां सर्वगतत्वं परममहत्त्वं सर्वसंयोगिसमान

3

त्वं २

देशत्वं च। पृथिव्यादीनां पंचानामपि भूतत्वेंद्रियप्रकृतित्वबाह्यैकैकेंद्रियग्राह्यविशेष
गुणवत्त्वानि। चतुर्णां द्रव्यारंभकत्वस्पर्शवत्त्वे। त्रयाणां प्रत्यक्षत्वरूपवत्त्वद्रवत्वानि।
द्वयोर्गुरुत्वं रसवत्त्वं च। भूतात्मनां वैशेषिकगुणत्वं। क्षित्युदकात्मनां चतुर्दशगुणव
त्त्वं। आकाशात्मनां क्षणिकैकदेशवृत्तिविशेषगुणवत्त्वं। दिक्कालयोः पंचगुणवत्त्वं सर्वो
त्पत्तिमतां निमित्तकारणत्वं च। क्षितितेजसोर्नैमित्तिकद्रवत्वयोगः। एवं सर्वत्र साध
र्म्यं विपर्ययाद्वैधर्म्यं च वाच्यमिति। इहेदानीमेकैकशो वैधर्म्यमुच्यते। पृथिवीत्वाभि
संबंधात् पृथिवी। रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापर
त्वगुरुत्वद्रवत्वसंस्कारवती। एते च गुणविनिवेशाधिकारे रूपादयो गुणविशेषाः सिद्धाः।
चाक्षुषवचनात् सप्त संख्यादयः। पतनोपदेशाद्गुरुत्वं। अद्भिः सामान्यवचनाद्द्रवत्वं। 1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्नास

उत्तरकर्मवचनात् संस्कार इति। क्षितावेव गंधः रूपमनेकप्रकारं शुक्लादिः र ४ ४
स षड्विधो मधुरादिः। गंधो द्विविधः सुरभिरसुरभिश्च। स्पर्शोऽनुष्णाशीतत्वे
सति पाकजः। सा तु द्विविधा नित्यानित्या च। परमाणुलक्षणा नित्या कार्यरूपो
ऽनित्यः। सा च स्वावयवयेव संनिवेशविशिष्टा। अपरजातिबहुत्वोपेता। शय
॥३॥ नाशनाद्यनेकोपकारकरी च। त्रिविधं चास्याः कार्यं। शरीरेंद्रियविषयरूपं। तत्र श ॥३॥
रीरं द्विविधं। योनिजमयोनिजं चेति। तत्रायोनिजमनपेक्ष्य शुक्रशोणितसंनिपातं।
देवऋषीणां शरीरं धर्मविशेषसहितेभ्योऽणुभ्यो जायते। क्षुद्रजंतूनां यातनाश
रीराणि अधर्मविशेषसहितेभ्योऽणुभ्यो जायंते। शुक्रशोणितसंनिपातजं योनिजं।
तद्द्विविधं। जरायुजं अंडजं चेति। मानुषपशुमृगाणां जरायुजं। पक्षीसरीसृपाणां

स्पर्श ५ ४

अंडजं। इंद्रियं गंधव्यंजकं सर्वप्राणिनां नासाग्रवर्ति जातैः पार्थिवावयवैरारब्धं
घ्राणं। विषयस्तु द्व्यणुकादिक्रमेणारब्धस्त्रिविधो मृत्पाषाणस्थावरलक्षणः।
तत्र भूप्रदेशाः प्राकारेष्टकादयो मृद्विकाराः। पाषाणा उपलमणिवज्रादयः।
स्थावरास्तृणौषधिवृक्षगुल्मलतावतानवनस्पतय इति। अप्त्वाभिसंबंधा
दापः। रूपरसस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्ने
हसंस्कारवत्यः। एते च पूर्ववत् सिद्धाः। शुक्लमधुरशीता एव रूपरसस्पर्शाः। स्नेहो
ऽम्भस्येव। सांसिद्धिकं द्रवत्वं च। तास्तु पूर्ववद्द्विविधा नित्यानित्याश्च भवंति। कार्यं पुनर्
त्रिविधं। शरीरेंद्रियविषयसंज्ञकं। तत्र शरीरमयोनिजमेव वरुणलोके। पार्थि
वावयवोपष्टंभाच्चोपभोगसमर्थं। इंद्रियं सर्वप्राणिनां रसोपलंभकं। विजातीया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रशस्त

नभिभूतैर्जलावयवैरारब्धं रसनं। विषयस्तु सरित्समुद्रहिमकरकादिरिति।
तेजस्त्वाभिसंबंधात्तेजः। रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपर
त्वापरत्वद्रवत्वसंस्कारवत्। पूर्ववदेषां सिद्धिः। शुक्लं भास्वरं च रूपं। उष्ण एव स्प
र्शः। तदपि द्विविधं। अणुकार्यभावात्। कार्यं शरीरादित्रयं। तत्र शरीरमयोनिजमे
॥४॥ वादित्यलोके। पार्थिवावयवोपष्टंभाच्चोपभोगसमर्थं। इंद्रियं सर्वप्राणिनां रू
पव्यंजकं। अन्यावयवानभिभूतैस्तैजसावयवैरारब्धं चक्षुः। विषयसंज्ञं चतुर्विधं।
भौमदिव्योदर्याकरजं च। तत्र भौमं काष्ठेंधनप्रभवं ऊर्ध्वज्वलनस्वभावं प
चनस्वेदनादिसमर्थं। दिव्यमबिंधनं विद्युदादि। भुक्तस्याहारस्य रसादिपरिणामार्थ
मुदर्यं। आकरजं च सुवर्णादि। तत्र संयुक्तसमवायाद्रसाद्युपलब्धिरिति। वायु
त्वाभिसंबंधाद्वायुः। स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्का

५ पा०
पो
॥४॥

रवान्। स्पर्शोऽस्यानुष्णाशीतत्वे सति अपाकजः। गुणविनिवेशात्सिद्धः। अरूपिष्वचा
क्षुषवचनात्। सप्त संख्यादयः। तृणकर्मवचनात्संस्कारः। स चायं द्विविधः। अणुकार्य
भावात्। अत्र कार्यलक्षणश्चतुर्विधः। शरीरेंद्रियविषयप्राणइति। तत्रायोनिजमे
व शरीरं मरुतां लोके। पार्थिवावयवोपष्टंभाच्चोपभोगसमर्थं। इंद्रियं सर्वप्राणिनां
स्पर्शोपलंभकं। पृथिव्याद्यनभिभूतैर्वाय्ववयवैरारब्धं। सर्वशरीरव्यापि त्वगिंद्रि
यं। विषयस्तूपलभ्यमानस्पर्शाधिष्ठानभूतः। स्पर्शशब्दधृतिकंपलिंगः। तिर्यग्गमन
स्वभावः। मेघादिप्रेरणादिसमर्थः। तस्याप्रत्यक्षस्यापि नानात्वं संमूर्छनेनानुमीय
ते। संमूर्छनं पुनः समानजवयोर्विरुद्धदिक्क्रिययोर्वाय्वोः सन्निपातः। सोपि तृणा
दिगमनेनानुमीते न सावयवविनो ऊर्ध्वगमनेनानुमीयते। प्राणोंतःशरीरे। रस
मलधातूनां प्रेरणादिहेतुः। एकः सन् क्रियाभेदादपानादिसंज्ञां लभते। इदानीं अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रशस्त

९ पा।

र्णां महाभूतानां सृष्टिसंहारविधिरुच्यते। ब्राह्मेण मानेन वर्षशतांते वर्त्तमान
स्य ब्रह्मणोऽपवर्गकाले संसारखिन्नानां प्राणिनां निशि विश्रामार्थं सकलभुवन
पतेर्महेश्वरस्य संजिहीर्षासमकालं शरीरेंद्रियमहाभूतोपनिबंधकानां सर्वात्म
गतादृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छात्माणुसंयोगजकर्मभ्यः शरीरेंद्रियका
रणाऽणुविभागेभ्यस्तत्संयोगनिवृत्तौ तेषामापरमाण्वंतो विनाशः। तथा पृथिव्युद
॥५॥ कज्वलनपवनानां महाभूतानां अनेनैव क्रमेणोत्तरस्मिन्नुत्तरस्मिन्सति पूर्वस्य पू ॥५
र्वस्य विनाशः। ततः प्रविभक्ताः परमण्वोऽवतिष्ठंते। धर्माधर्मसंस्कारानुविद्धाश्चात्मान
स्तावंतमेव कालं। ततः पुनः प्राणिनां भोगभूतये महेश्वरस्य सिसृक्षानंतरं सर्वा
त्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ तेषां परस्प
रसंयोगेभ्यो द्व्यणुकादिप्रक्रमेण महान्वायुः समुत्पन्नो नभसि दोधूयमानस्तिष्ठति

९

तदनंतरं तस्मिन्नेवं आप्यपरमाणुभ्यः तेनैव क्रमेण महान्सलिलनिधिरुत्पन्नः
दोधूयमानस्तिष्ठति। तदनंतरं तस्मिन्नेव पार्थिवेभ्यो अणुभ्यो द्व्यणुकादिप्रक्र
मेण महापृथिवी संहता संवृताऽवतिष्ठते। तदनंतरं तैजसेभ्योऽणुभ्यो द्व्यणुका
दिप्रक्रमेणोत्पन्नो महातेजसो राशिः देदीप्यमानस्तिष्ठति। एवं समुत्पन्नेषु चतु
र्षु महाभूतेषु महेश्वराभिध्यानमात्रात्तैजसेभ्योऽणुभ्यः पार्थिवपरमाणुसहितेभ्यो
महदंडमारभ्यते। तस्मिन्नंडे चतुर्वदनकमलं सर्वलोकपितामहं ब्रह्माणं सर्वभुव
नसहितमुत्पाद्य प्रजासर्गे विनियुंक्ते। स च महेश्वरेण नियुक्तो निरतिशयः ज्ञानवै
राग्यैश्वर्यसंपन्नः प्राणिनां कर्मविपाकं विदित्वा कर्मानुरूपज्ञानभोगायुषः सुतान्
प्रजापतीन्मानसान्मनुदेवऋषिपितृगणान्मुखबाहूरुपादतश्चतुरो वर्णा

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शास्त्र | ८ पा

नन्यान्यक्षावयवानि भूतानि सृष्ट्वा आशयानुरूपैर्धर्मज्ञानवैराग्यैश्वर्यैः संयोजयति।
।इति सृष्टिसंहारौ॥ ॥ आकाशकालदिशामेकैकत्वादपरजात्यभावे पारिभाषिक्य
स्तिस्रः संज्ञा भवंति। आकाशं कालो दिगिति। तत्राकाशस्य गुणाः। शब्दसंख्यापरिमा
णपृथक्त्वसंयोगविभागाः। शब्दोऽस्मदादिप्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वात् या
॥ ६ ॥ वद्द्रव्यभावित्वादाश्रयादन्यत्रोपलब्धेश्च न स्पर्शवद्विशेषगुणः। बाह्येंद्रियप्रत्यक्षत्वात् आ ॥ ६ ॥
त्मांतरग्राह्यत्वात् आत्मन्यसमवायादहंकारेण विभक्तग्रहणाच्च नात्मगुणः। श्रोत्रग्राह्यत्वा
द् विशेषगुणभावाच्च न दिक्कालमनसां। परिशेषात् गुणो भूत्वा आकाशस्याधिगमे
लिंगं। शब्दलिंगाविशेषादेकत्वं सिद्धं तदनुविधानात् पृथक्त्वमपि विभववचनात् प
रममहत्परिमाणं। शब्दकारणवचनात् संयोगविभागाविति। अतो गुणवत्त्वादनाश्रितत्वाद्या।

ना

द्रव्यं समानासमानजातीयकारणाभावाच्च नित्यः। सर्वप्राणिनां शब्दोपलब्धिनिमि
त्तं। श्रोत्रभावेन श्रोत्रं पुनः श्रवणविवरसंज्ञको नभोदेशः। शब्दनिमित्तोपभोगप्रा। प
क धर्माधर्मोपनिबद्धः। तस्य च नित्यत्वे सति उपनिबंधकवैकल्याद्बाधिर्यमिति॥ काल
परापरव्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययलिंगः। तेषां विषयेषु पूर्वप्रत्यय
विलक्षणानामुत्पत्तावन्यनिमित्तासंभवात्। यदत्र निमित्तं स कालः। सर्वकार्याणां
चोत्पत्तिस्थितिविनाशहेतुः। तद्व्यपदेशात्। क्षणलवनिमेषकाष्ठाकलामुहूर्तयामा
होरात्रार्धमासमासर्त्वयनसंवत्सरयुगकल्पमन्वंतरप्रलयमहाप्रलयव्य
वहारहेतुश्च। तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः। काललिंगावि
शेषादेकत्वं सिद्धं तदनुविधानात् पृथक्त्वं। कारणे कालेति वचनात् परममहत्परिमाणं।
कारणपरत्वादिवचनात् संयोगः। तद्विनाशकत्वाद्विभाग इति। तस्याकाशवन्नित्यत्वे ऽयत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रशस्त

सिद्धे कालल्लिंगाविशेषाद्दंजसैकत्वेपि सर्वकार्याणां आरंभक्रियाभिनिर्वृत्तिनि
रोधोपाधिभेदान्मणिवत्पाचकवद्वा नानात्वोपचार इति दिक् पूर्वापरादिप्र
त्ययलिंगा। मूर्तद्रव्यमवधिं कृत्वा मूर्तेष्वेव द्रव्येषु तस्मादिदं पूर्वेण दक्षिणेन पश्चि
मेनोत्तरेण पूर्वदक्षिणेन दक्षिणपश्चिमेन पश्चिमोत्तरेणोत्तरपूर्वेणाधस्तादु
॥७॥ परिष्टाद्येति दश प्रत्यया यतो भवंति सा दिगिति अन्यनिमित्तासंभवात् । तस्यास्तु गुणाः
संख्यापरिमाणपृथक्त्वसंयोगविभागाः कालवदेते सिद्धाः दिग्लिंगाविशेषादंज ॥७॥
सैकत्वेपि दिशः परमर्षिभिः श्रुतिस्मृतिलोकसंव्यवहारार्थं मेरुं प्रदक्षिणमावर्तमा
नस्य भगवतः सवितुर्ये संयोगाल्लोकपालपरिगृहीतदिक्प्रदेशानामन्वर्थाः प्राच्यादिभे
देन दशविधाः संज्ञाः कृताः । ततो भक्त्या दश दिशः सिद्धाः तासामेव देवतापरिग्रहवशात्
पुनर्दश संज्ञा भवंति । तद्यथा माहेंद्री वैश्वानरी याम्या नैरृती वारुणी वायुवीया इमसीः

शानी ब्राह्मी नागी चेति । आत्मत्वाभिसंबंधादात्मा । तस्य सौक्ष्म्यादप्रत्यक्षत्वेपि सति करणैः
शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते । वास्यादीनामिव करणानां
कर्तृप्रयोज्यत्वदर्शनात् शब्दादिषु प्रसिद्ध्या च प्रसाधकोनुमीयते । न शरीरेंद्रियमनसां
तेषामज्ञत्वात् । न शरीरस्य चैतन्यं घटादिवद्भूतकार्यत्वात् मृते चासंभवात् । नेंद्रियाणां
करणत्वात् उपहतेषु विषयासांनिध्ये चानुस्मृतिदर्शनात् । नापि मनसः करणां
तरानपेक्षित्वे युगपदालोचनस्मृतिप्रसंगात् । स्वयं करणभावाच्च । पारिशेष्यादात्मकार्यत्वे
नात्मा समधिगम्यते । शरीरसमवायिनीभ्यां हिताहितप्राप्तिपरिहारयोग्याभ्यां प्रवृत्ति
निवृत्तिभ्यां रथकर्मणा सारथिवत् प्रयत्नवान् विग्रहस्याधिष्ठातानुमीयते । प्राणादिभिश्च
काप्यं शरीरपरिगृहीते वायौ विकृतकर्मदर्शनात् भस्त्राध्मापयितेव । निमिषोन्मेष
कर्मणा नियतेन दारुयंत्रप्रयोक्तेव । देहस्य वृद्धिक्षतभग्नसंरोहणादिनिमित्तत्वात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८॥

यहपतिरिव। अत्रिमतविषयग्राहककरणसंबंधनिमित्तेन मनःकर्मणा ग्रहको
णस्य प्रेरकः प्रेरको दारक इव। नयनविषयालोचनानंतरं रसानुस्मृतिक्रमेण र
सनविक्रियादर्शनादनेकगवाक्षांतर्गतप्रेक्षकवदुभयदर्शी। सुखदुःखेच्छाद्वे
षप्रयत्नैश्च गुणैर्गुण्यनुमीयते। ते च न शारीरेंद्रियगुणाः। कस्मादहंकारेणैकवा
क्यभावात् प्रदेशवृत्तित्वात् अयावद्द्रव्यभावित्वाद्बाह्येंद्रियाप्रत्यक्षत्वाच्च। तथा चाह
शब्देन पृथिव्यादिशब्दव्यतिरेकादिति। तस्य गुणाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नध
र्माधर्मसंस्कारसंख्यापरिमाणपृथक्त्वसंयोगविभागाः आत्मलिंगाधिकारे बुद्ध्या
दयः प्रयत्नांताः सिद्धाः। धर्माधर्मावात्मांतरगुणेषामांतरगुणानामकारणवचनात्।
संस्कारस्पर्शस्पर्शो। व्यवस्थावचनात्संख्या। पृथक्त्वमप्यत एव तथा चात्मेतिवचना

॥८॥

त्परममहत्परिमाणं। सन्निकर्षजन्यत्वात्सुखदुःखादीनां संयोगः। तद्विनाशकत्वा
द्विभाग इति॥ मनस्त्वाभिसंबंधान्मनः॥ सत्यप्यात्मेंद्रियार्थसान्निध्ये ज्ञानसुखादी
नां अभूत्वोत्पत्तिदर्शनात् कारणांतरमनुमीयते। श्रोत्राद्यव्यापारे च स्मृत्युत्पत्ति
दर्शनात्। बाह्येंद्रियैरग्रहीतसुखादिग्राह्यांतरभावात्। तस्य गुणाः संख्यापरिमाण
पृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः प्रयत्नज्ञानायौगपद्यवचनात् प्रतिश
रमेकत्वं सिद्धं। पृथक्त्वमप्यत एव। तदभाववचनादणुपरिमाणं। अपसर्पणोपसर्पण
कर्मवचनात्संयोगविभागौ। मूर्त्तत्वात्परत्वापरत्वे संस्कारश्च अस्पर्शवत्वात् द्रव्यारं
भकं। क्रियावत्वान्मूर्त्तं। साधारणविग्रहवत्वप्रसंगाद् इष्टं। स्वयंकरणभावात्परा
गुणवत्वात् द्रव्यं। प्रयत्नादृष्टपरिग्रहवशादाशुसंचारी चेति॥ ॥ इतिद्रव्यपदार्थः॥ ८॥

KKSU LIBRARY RAMTEK 441 106 M-1718 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=26.10.20 10:18
,TRANSFERRED=2020/10/26 at 10:20:07
,PAGES=8
,TYPE=STD
,NAME=S0004524
,Book Name=M-1718-MANDUKYOPNIDHAD
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection